Panchmukhi Hanuman Kavach

श्रीपञ्चमुखहनुमत्कवचम्

NityaPaath
nityapaath.com/hanuman-kavach/

VINIYOGA · विनियोगः

1 श्रीगणेशाय नमः॥ ॐ श्रीपञ्चवदनायाञ्जनेयाय नमः॥
ॐ अस्य श्रीपञ्चमुखहनुमत्कवचमंत्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, पञ्चमुखविराट् हनुमान् देवता, ह्रीं बीजं, श्रीं शक्तिः, क्रौं कीलकं, क्रूं कवचं, क्रैं अस्त्राय फट् इति दिग्बंधः॥

SHLOKA · श्रीगरुड उवाच

1 अथ ध्यानं प्रवक्ष्यामि शृणु सर्वाङ्गसुन्दरि।
यत्कृतं देवदेवेन ध्यानं हनुमतः प्रियम्॥

2 पञ्चवक्त्रं महाभीमं त्रिपञ्चनयनैर्युतम्।
बाहुभिर्दशभिर्युक्तं सर्वकामार्थसिद्धिदम्॥

3 पूर्वं तु वानरं वक्त्रं कोटिसूर्यसमप्रभम्।
दंष्ट्राकरालवदनं भृकुटीकुटिलेक्षणम्॥

4 अस्यैव दक्षिणं वक्त्रं नारसिंहं महाद्भुतम्।
अत्युग्रतेजोवपुषं भीषणं भयनाशनम्॥

5 पश्चिमं गारुडं वक्त्रं वक्रतुण्डं महाबलम्।
सर्वनागप्रशमनं विषभूतादिकृन्तनम्॥

6 उत्तरं सौकरं वक्त्रं कृष्णं दीप्तं नभोपमम्।
पातालसिंहवेतालज्वररोगादिकृन्तनम्॥

7 ऊर्ध्वं हयाननं घोरं दानवान्तकरं परम्।
येन वक्त्रेण विप्रेन्द्र तारकाख्यं महासुरम्॥

8 जघान शरणं तत्स्यात्सर्वशत्रुहरं परम्।
ध्यात्वा पञ्चमुखं रुद्रं हनुमन्तं दयानिधिम्॥

9 खड्गं त्रिशूलं खट्वांगं पाशमंकुशपर्वतम्।
मुष्टिं कौमोदकीं वृक्षं धारयन्तं कमण्डलुम्॥

10 भिन्दिपालं ज्ञानमुद्रां दशभिर्मुनिपुंगवम्।
एतान्यायुधजालानि धारयन्तं भजाम्यहम्॥

11 प्रेतासनोपविष्टं तं सर्वाभरणभूषितम्।
दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम्॥

12 सर्वाश्चर्यमयं देवं हनुमद्विश्वतोमुखम्॥
पञ्चास्यमच्युतमनेकविचित्रवर्णं
वक्त्रं शशाङ्कशिखरं कपिराजवर्यम्।
पीताम्बरादिमुकुटैरुपशोभिताङ्गं
पिङ्गाक्षमाद्यमनिशं मनसा स्मरामि॥

13 मर्कटेशं महोत्साहं सर्वशत्रुहरं परम्।
शत्रुं संहर मां रक्ष श्रीमन्नापदमुद्धर॥

14 ॐ हरिमर्कटमर्कटमंत्रमिदं परिलिख्यति लिख्यति वामतले।
यदि नश्यति नश्यति शत्रुकुलं यदि मुञ्चति मुञ्चति वामलता॥

MANTRA · मन्त्राः

1 ॐ हरिमर्कटाय स्वाहा।
ॐ नमो भगवते पञ्चवदनाय पूर्वकपिमुखाय सकलशत्रुसंहारणाय स्वाहा॥
ॐ नमो भगवते पञ्चवदनाय दक्षिणमुखाय करालवदनाय नरसिंहाय सकलभूतप्रमथनाय स्वाहा॥
ॐ नमो भगवते पञ्चवदनाय पश्चिममुखाय गरुडाननाय सकलविषहराय स्वाहा॥
ॐ नमो भगवते पञ्चवदनायोत्तरमुखायादिबराहाय सकलसम्पत्कराय स्वाहा॥
ॐ नमो भगवते पञ्चवदनायोर्ध्वमुखाय हयग्रीवाय सकलजनवशंकराय स्वाहा॥

2 ॐ अस्य श्रीपञ्चमुखहनुमन्मन्त्रस्य श्रीरामचन्द्र ऋषिः, अनुष्टुप् छन्दः, पञ्चमुखवीरहनुमान् देवता, हनुमानिति बीजम्, वायुपुत्र इति शक्तिः, अंजनीसुत इति कीलकम्, श्रीरामदूतहनुमत्प्रसादसिद्ध्यर्थे जपे विनियोगः॥ इति ऋष्यादिकं विन्यस्य

3 ॐ अञ्जनीसुताय अंगुष्ठाभ्यां नमः। ॐ रुद्रमूर्तये तर्जनीभ्यां नमः। ॐ वायुपुत्राय मध्यमाभ्यां नमः। ॐ अग्निगर्भाय अनामिकाभ्यां नमः। ॐ रामदूताय कनिष्ठिकाभ्यां नमः। ॐ पञ्चमुखहनुमते करतलकरपृष्ठाभ्यां नमः। इति करन्यासः॥

4 ॐ अञ्जनीसुताय हृदयाय नमः। ॐ रुद्रमूर्तये शिरसे स्वाहा। ॐ वायुपुत्राय शिखायै वषट्। ॐ अग्निगर्भाय कवचाय हूं। ॐ रामदूताय नेत्रत्रयाय वौषट्। ॐ पञ्चमुखहनुमते अस्त्राय फट्॥ ॐ पञ्चमुखहनुमते स्वाहा॥ इति दिग्बन्धः॥

5 अथ ध्यानम्॥
वन्दे वानरनारसिंहखगराट्क्रोडाश्ववक्त्रान्वितं
दिव्यालङ्करणं त्रिपञ्चनयनं देदीप्यमानं रुचा।
हस्ताब्जैरसिखेटपुस्तकसुधाकुम्भांकुशाद्रिं हलं
खट्वाङ्गं फणिभूरुहं दशभुजं सर्वारिवीरापहम्॥ १॥
इति॥

6 अथ मन्त्रः॥
ॐ श्रीरामदूताय्ञ्जनेयाय वायुपुत्राय
महाबलपराक्रमाय सीतादुःखनिवारणाय
लङ्कादहनकारणाय महाबलप्रचण्डाय फाल्गुनसखाय
कोलाहलसकलब्रह्माण्डविश्वरूपाय
सप्तसमुद्रनिर्लङ्घनाय पिङ्गलनयनायामितविक्रमाय
सूर्यबिम्बफलसेवनाय दुष्टनिवारणाय दृष्टिनिरालंकृताय
सञ्जीविनीसञ्जीविताङ्गदलक्ष्मणमहाकपिसैन्यप्राणदाय
दशकण्ठविध्वंसनाय रामेष्टाय महाफाल्गुनसखाय
सीतासहितरामवरप्रदाय
षट्प्रयोगागमपञ्चमुखवीरहनुमन्मंत्रजपे विनियोगः॥

7 ॐ हरिमर्कटमर्कटाय बं बं बं बं बं वौषट् स्वाहा।
ॐ हरिमर्कटमर्कटाय फं फं फं फं फं फट् स्वाहा।
ॐ हरिमर्कटमर्कटाय खें खें खें खें खें मारणाय स्वाहा।
ॐ हरिमर्कटमर्कटाय लुं लुं लुं लुं लुं आकर्षितसकलसम्पत्करय स्वाहा।
ॐ हरिमर्कटमर्कटाय धं धं धं धं धं शत्रुस्तम्भनाय स्वाहा।
ॐ टं टं टं टं टं कूर्ममूर्तये पञ्चमुखवीरहनुमते परयंत्रपरतंत्रोच्चाटनाय स्वाहा।
ॐ कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं ळं क्षं स्वाहा।
इति दिग्बंधः॥

8 ॐ पूर्वकपिमुखाय पंचमुखहनुमते टं टं टं टं टं सकल स्वाहा॥
ॐ दक्षिणमुखाय पंचमुखहनुमते करालवदनाय नरसि ह्रौं ह्रः सकलभूतप्रेतदमनाय स्वाहा॥
ॐ पश्चिममुखाय गरुडाननाय पंचमुखहनुमते मं मं मं सकलविषहराय स्वाहा॥
ॐ उत्तरमुखायादिवराहाय लं लं लं लं लं नृसिंहाय नी पंचमुखहनुमते स्वाहा॥
ॐ ऊर्ध्वमुखाय हयग्रीवाय रुं रुं रुं रुं रुं रुद्रमूर्तये सकलप्रयोजननिर्वाहकाय स्वाहा॥
ॐ अञ्जनीसुताय वायुपुत्राय महाबलाय सीताशोक श्रीरामचंद्रकृपापादुकाय महावीर्यप्रमथनाय ब्रह्माण्डन पञ्चमुखवीरहनुमते स्वाहा॥
भूतप्रेतपिशाचब्रह्मराक्षसशाकिनीडाकिन्यन्तरिक्षग्रहप स्वाहा॥
सकलप्रयोजननिर्वाहकाय पञ्चमुखवीरहनुमते श्रीराम जं जं जं जं स्वाहा॥

PHALASHRUTI · फलश्रुति

15 इदं कवचं पठित्वा तु महाकवचं पठेन्नरः।
एकवारं जपेत्स्तोत्रं सर्वशत्रुनिवारणम्॥

16 द्विवारं तु पठेन्नित्यं पुत्रपौत्रप्रवर्धनम्।
त्रिवारं च पठेन्नित्यं सर्वसम्पत्करं शुंभम्॥

17 चतुर्वारं पठेन्नित्यं सर्वरोगनिवारणम्॥
पञ्चवारं पठेन्नित्यं सर्वलोकवशङ्करम्॥

18 षड्वारं च पठेन्नित्यं सर्वदेववंशङ्करम्।
सप्तवारं पठेन्नित्यं सर्वसौभाग्यदायकम्॥

19 अष्टवारं पठेन्नित्यमिष्टकामार्थसिद्धिदम्।
नववारं पठेन्नित्यं राजभोगमवाप्नुयात्॥

20 दशवारं पठेन्नित्यं त्रैलोक्यज्ञानदर्शनम्।
रुद्रावृत्तिं पठेन्नित्यं सर्वसिद्धिर्भवेद् ध्रुवम्॥

21 कवचस्मरणेनैव महाबलमवाप्नुयात्॥

Text checked against: Brihat Stotra Ratnakar (sachitra, 227 stotras), Khemraj Shrikrishnadas, Shri Venkateshwar Press, Mumbai; reprint February 2020. Meanings, audio and all scripts at nityapaath.com/hanuman-kavach/